# shrI vIrabhadra daNDakam 1

# શ્રીવીરભદ્રદણ્ડકમ્ ૧

## Document Information

Text title : vIrabhadradaNDakam 1

File name : vIrabhadradaNDakam1.itx

Category : shiva, daNDaka

Location : doc_shiva

Latest update : July 22, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીવીરભદ્રદણ્ડકમ્ ૧

શ્રી ભદ્ર । ભદ્રામ્બિકાપ્રાણનાથા । સુરારાતિભઙ્ગા । પ્રભો ।
રુદ્ર । રૌદ્રાવતારા । સુનાસીર મુખ્યામરાનેક સમ્ભાવિતાનલ્પ
સુશ્લોકચારિત્ર । કોટ્યર્કસઙ્કાશ દેદીપ્યમાનપ્રભા । દિવ્યગાત્રા
શિવા । પાલિતાશેષબ્રહ્માણ્ડભાણ્ડોદરા । મેરુધીરા । વિરાડ્રૂપ ।
વારાશિગમ્ભીર । સૌજન્યરત્નાકરા । વારિદશ્યામ । નારાયણધ્યેય
મૌનીન્દ્રચિત્તાબ્જભૃઙ્ગા । સુરારાતિભઙ્ગા । મહોદાર ।
ભક્તૌઘકલ્પદ્રુમા । શિષ્ટરક્ષા । પ્રશસ્તપ્રતાપોજ્જ્વલા ।
શ્રીકરા । ભીકરા । ભીકરાલોક । ચૂર્ણીકૃતાર્યેષુ દોર્દણ્ડ પાણ્ડિત્ય
સંરમ્ભણોલ્લાસ । રાજત્કરામ્ભોજ વિન્યસ્ત ખડ્ગત્રિશૂલાદિનાનાયુધા ।
ભણ્ડનાચાર્ય । રુદ્રાક્ષમાલાલસદ્દેહ । રત્નાઞ્ચિતાનર્ઘ સૌવર્ણ
કેયૂર ભાસ્વત્ કિરીટોત્તમાઙ્ગા । ત્રિપુણ્ડ્રાઙ્ક સર્વાઙ્ગસંશોભિતા
ચન્દ્રકોટીર । હેમામ્બરાડમ્બરા । દૈવચૂડામણી । સન્તતાખણ્ડ ।
દીર્ઘાયુરારોગ્યસૌભાગ્યસિદ્ધિપ્રદા । દેવ । તાપત્રયધ્વાન્તભાનૂ ।
વિયત્કેશ । મૃત્યુઞ્જયા । દીનચિન્તામણી । સર્વલોકેશ । લોકાત્મ ।
લોકસ્વરૂપા । મહાયજ્ઞવિધ્વંસનાધ્યક્ષ । દાક્ષાયણીપુત્ર ।
અક્ષીણપુણ્યા । વિભો । વીરભદ્રા । મહાકાલરુદ્રા । કૃપામુદ્ર ।
માં પાહિ દીનબન્ધો । દયાવારિરાશી । લસચ્ચિત્રભૂષા ।
મહાદિવ્યવેષા । હરા । ભક્તપોષા । દયાવાર્થિ । વીરેશ્વરા ।
નિત્યકલ્યાણસન્ધાનધૌરેય । પાપાટવી કીલ દાવાનલા ।
પુણ્યમૂર્તે । નમસ્તે નમસ્તે નમસ્તે નમઃ ॥

ઇતિ શ્રીવીરભદ્રદણ્ડકં સમ્પૂર્ણમ્ ।

Encoded and proofread by
Malleswara Rao Yellapragada malleswararaoy at yahoo.com

*shrI vIrabhadra daNDakam 1*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*